साचादेव महादेवस्तज्ज्ञानमिति कीर्त्तितम् ॥”
इति कौर्म्मे उपविभागे १४ अध्याय: ॥

विज्ञानपाद:, पुं, ( विज्ञानमेव पादं लक्ष्यं यस्य । ) वेदव्यास: । इति केचित् ॥

विज्ञानमयकोष:, पुं, ( विज्ञानमयस्तदात्मक: कोष इवाच्छादकत्वात् ।) ज्ञानेन्द्रियै: सहिता बुद्धि: । इति वेदान्तसार: ॥

विज्ञानमातृक:, पुं, ( विज्ञानं मातेव यस्य । बहुव्रीहौ कन् । ) बुद्ध: । इति हेमचन्द्र: ॥

विज्ञानिक:, त्रि, ( विज्ञानमस्यस्येति । विज्ञान+ठन् ।) ज्ञानविशिष्ट: । विज्ञ: । इति वैज्ञानिकशब्दटीकायां भरत: ॥

विज्ञापनं, क्ली, (वि+ज्ञा+णिच्+ल्युट् ।) बोधनम् । जानान इति भाषा । विपूर्व्वण्यन्तज्ञाधातोरनट्प्रत्ययेन निष्पन्नम् ॥ ( यथा, कथासरित्सागरे । ३१ । ५८ ।
“तया विज्ञापनायाहं प्रेषित: स्वीकुरुष्व ताम्।
युवयोरस्तु योगोऽयं कौमुदीचन्द्रयोरिव ॥”*॥
स्त्री, वि+ज्ञा+णिच्+युच् । टाप् । विज्ञापना । यथा, रघु: । १७ । ४० ।
“तत: परमभिव्यक्तसौमनस्यनिवेदितै: ।
युयोज पाकाभिमुखैर्भृत्यान् विज्ञापनाफलै: ॥”)

विज्ञाप्ति:, स्त्री, ( वि+ज्ञा+णिच्+क्तिन् । ) विज्ञापनम् । विपूर्व्वण्यन्तज्ञाधातो: क्तिप्रत्ययेन निष्पन्ना ॥ (विकल्पेन ह्रस्वे विज्ञप्तिरपि ॥)

विज्ञेयं, त्रि, ( विज्ञातुं योग्यम् । वि+ज्ञा+ “अचो यत् ।” ३ । १ । ९७ । इति यत् । “ईद्यति ।” ६ । ४ । ६५ । इति आत ईत् । ) विज्ञातव्यम् । विज्ञानीयम् । विपूर्व्वज्ञाधातोर्यप्रत्ययेन निष्पन्नम् ॥ ( यथा, मनु: । २ । १० ।
“श्रुतिस्तु वेदो विज्ञेयो धर्म्मशास्त्रन्तु वै
स्मृति: ॥” )

विज्ञामरं, क्ली, चक्षु:शुक्लरोगम् । इति केचित् ॥

विज्जोली, स्त्री, पङ्क्ति: । इति त्रिकाण्डशेष: ॥

विट, आक्रोशे । स्वने । इति कविकल्पद्रुम: ॥ (भ्वा०-पर०-सक०-स्वने अक०-सेट् । ) वेटति । आक्रोश: । केचिन्न पठन्ति । स्वन: शब्द: । इति दुर्गादास: ॥

विट:, पुं, ( वेटतीति । विट+क: । ) षिड्ग: । इत्यमर: ॥ ( यथा, भागवते । १० । १३ । २ ।
“सतामयं सारभृतां निसर्गो
यदर्थवाणीश्रुतिचेतसामपि ।
प्रतिक्षणं नव्यवदच्युतस्य यत्
स्त्रिया विटानामिव साधु वार्त्ता ॥”)
कामुकानुचर: । धूर्त्त: । इति भरत: ॥ कामतन्त्रकलाकोविद: । इति रसमञ्जरी ॥ पर्व्वतविशेष: । लवणभेद: । खदिरविशेष: । मूषिक: । इति मेदिनी । टे, २८ ॥ नारङ्गवृक्ष: । इति शब्दमाला ॥

विटङ्क:, पुं क्ली, ( विशेषेण टङ्क्यते सौधादिषु इति । वि+टङ्क बन्धने+घञ् । ) कपोतपालिका । पायरार खोप इति भाषा । इत्यमर: ॥ हे सौधादिषु प्रान्ते काष्ठादिरचिते गृहपक्षिस्थाने । कपोतान् पालयतीति कपोतपाली ण्यात् घञ् इति घञ् स्वार्थे क: कपोत इत्युपलक्षणं पक्षिमात्रपालिकेति बोध्यम् । वीन् पक्षि, शङ्कयन्ति बध्नाति विटङ्कं टकि क बन्धे घञ् विशेषेण टङ्कयत्यत्रेति वा अल् घञ् वा । इति भरत: ॥ ( यथा, माघे । ३ । ५५ ।
“रतान्तरे यत्र गृहान्तरेषु
वितर्द्दिनिर्य्यूहविटङ्कनीड: ।
रुतानि शृण्वन् वयसां गणोऽन्तेवासित्वमाप स्फुटमङ्गनानाम् ॥”*॥
सुन्दरे, त्रि । यथा, भागवते । ३ । १५ । २७ ।
“देवावचक्षत गृहीतगदौ परार्द्ध्य-
केयूरकुण्डलकिरीटविटङ्कवेशौ ॥”)

विटङ्कक:, पुं क्ली, ( विटङ्क एव । स्वार्थे कन् । ) विटङ्क: । इति शब्दरत्नावली ॥

विटप:, पुं क्ली, ( वेटति शब्दायते इति । विट+ “विटपपिष्टपविशिपोलपा: ।” उणा० ३।१४५ । इति कप्रत्ययेन निपातनात् साधु: । ) शाखापल्लवसमुदाय: । तत्पर्य्याय: । विस्तार: २ । इत्यमर: ॥ स्तम्ब: ३ । इति मेदिनी । पे, २२ ॥ शाखा । ( यथा, रघु: । १० । ११ ।
“बाहुभिर्विटपाकारैर्दिव्याभरणभूषितै: ।
आविर्भूतमपां मध्ये पारिजातमिवापरम् ॥”)
पल्लव: । इति शब्दरत्नावली ॥ ( यथा, ऋतुसंहारे । १ । २४ ।
“तरुविटपलताग्रालिङ्गनव्याकुलेन
दिशि दिशि परिदग्धा भूमय: पावकेन ॥”)
क्ली, मुष्कवङ्क्षणान्तरम् । यथा,—
“विटपन्तु महावीण्यमन्तरामुष्कवङ्क्षणम् ॥”
इति हेमचन्द्र: ॥
( यथा, सुश्रुते । ३ । ६ ।
“वङ्क्षणवृषणयोरन्तरे विटपं नाम तत्र षाण्ड्यमल्पशुक्रता वा भवति ॥”)

विटप:, पुं, (विटान् पातीति । पा+क: ।) विटाधिप: । पारदारिकश्रेष्ठ: । इति मेदिनी । पे, २२ ॥ आदित्यपत्र: । इति राजनिर्घण्ट: ॥

विटपी, [न्] पुं, ( विटप: शाखादिरस्यस्येति । विटप+इनि: । ) वृक्ष: । इत्यमर: ॥ ( यथा, आर्य्यासप्तशत्याम् । ४८६ ।
“यूथपते तव कश्चिन्नहि मानस्यानुरूप इह
विटपी ।
प्रेरय दिनं निदाघद्राघीय: क खलु ते छाया ॥”)
वट: । इति राजनिर्घण्ट: ॥ ( विटपयुक्ते, त्रि । यथा, महाभारते । १ । ४३ । १० ।
“अङ्कुरं क्रतवांस्तत्र तत: पर्णद्वयान्वितम् ।
पलाशिनं शाखिनञ्च तथा विटपिनं पुन: ॥”)

विटप्रिय:, पुं, ( विटानां प्रिय: । ) मुद्गरवृक्ष: । इति राजनिर्घण्ट: ॥

विटमाक्षिक:, पुं, ( विटप्रियो माक्षिक: । ) धातुविशेष: । तत्पर्य्याय: । ताप्य: २ नदीज: ३ कामारि: ४ ताराारि: ५ । इति हेमचन्द्र: ॥

विटलवणं, क्ली, ( विटसंज्ञकं लवणम् । ) विडलवणम् । इति केचित् ॥

विटि:, स्त्री, ( विटतीति । विट्+इन् । स च कित् । ) पीतचन्दनम् । इति शब्दमाला ॥

विट्, [श्] पुं, ( विश्+क्विप् । ) वैश्य: । (यथा, मनु: । २ । ३६ ।
“गर्भाष्टमेऽब्दे कुर्व्वीत ब्राह्मणस्योपनायनम् ।
गर्भादेकादशे राज्ञो गर्भात्तु द्वादशे विश: ॥”)
मनुज: । इत्यमर: ॥ ( यथा, रघु: । १ । ९३ ।
“अथ प्रदोषे दोषज्ञ: संवेशाय विशांपतिम् ।
सूनु: सूनृतवाक् स्रष्टु: विससर्जोदितश्रियम् ॥”)
प्रवेश: । इति विश्व: ॥

विट्, [ष्] स्त्री, ( विष व्याप्तौ+क्विप् । ) विष्ठा । इत्यमर: ॥ कन्या । इति विट्पतिशब्ददर्शनात् ॥ ( व्याप्ते, त्रि । यथा, ऋग्वेदे । ८ । १९ । ११ ।
“हव्या वा वेविषद्विष: ।”
“विष: व्याप्तान् देवान् वेविषत् प्रापयेत् ।” इति तद्भाष्ये सायण: ॥)

विट्कारिका, स्त्री, पक्षिविशेष: । तत्पर्य्याय: । कृष्णपी २ गोराटी ३ गोकिराटिका ४ । इति भूरिप्रयोग: ॥ विट्मारिका ५ । इति हारावली ॥

विट्खदिर:, पुं, ( विड्वत् दुर्गन्ध: खदिर: । ) विष्ठावद्गन्धखदिर: । गुयेबावला इति भाषा ॥ तत्पर्य्याय: । अरिमेद: २ । इत्यमर: ॥ हरिमेद: ३ अविमेद: ४ । इति शब्दरत्नावली ॥ इरिमेद: ५ कालस्कन्ध: ६ अरिमेदक: ७ । अस्य गुणा: । कषायत्वम् । उष्णत्वम् । मुखदन्तगदास्रकण्डूविषश्लेष्मक्रिमिकुष्ठव्रणग्रहनाशित्वञ्च । इति भावप्रकाश: ॥ राजनिर्घण्टोक्तगुणपर्य्यायौ अरिमेदशब्दे द्रष्टव्यौ ॥

विट्चर:, पुं, ( विषि विष्ठायां चरतीति । चर+ट: । ) ग्राम्यशूकर: । इत्यमर: ॥

विट्पति:, पुं, (विष: कन्याया: पति: ।) जामाता । इति जटाधर: ॥ ( यथा, मनु: । ३ । १४८ ।
“मातामहं मातुलञ्च स्वस्रीयं श्वशुरं गुरुम् ।
दौहित्रं विट्पतिं बन्धुमृत्विग्याज्यौ च भोज-
येत् ॥” * ॥
वैश्यानां पति: । यथा, भागवते ।४।२३ । ३२ ।
“वैश्य: पठन् विट्पति: स्यात् शूद्र: सत्तमता-
मियात् ॥”
“विशां प्रजादीनां वैश्यादीनां वा पति: स्यात् ।”
इति तट्टीका ॥ )

विट्सारिका, स्त्री, (विट्प्रिया सारिका ।) पक्षिविशेष: । इति जटाधर: ॥ गुये सालिक् इति भाषा ॥

विठर:, पुं, वाग्मी । इति संक्षिप्तसारोणादिवृत्ति: ॥

विड, आक्रोशे । इति कविकल्पद्रुम: ॥ (भ्वा०-पर०-सक०-सेट् । ) वेडति शत्रुं बली । इति दुर्गादास: ॥